# .. a NgArakastotram ..

# ॥ અઙ્ગારકસ્તોત્રમ્ ॥

## Document Information

Text title : angArakastotram

File name : angaarakastotram.itx

Location : doc_z_misc_navagraha

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Kirk Wortman kirkwort at hotmail.com

Proofread by : Kirk Wortman kirkwort at hotmail.com

Latest update : August 24, 2006

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ અઙ્ગારકસ્તોત્રમ્ ॥

અસ્ય શ્રી અઙ્ગારકસ્તોત્રસ્ય ।
વિરૂપાઙ્ગિરસ ઋષિઃ ।
અગ્નિર્દેવતા ।
ગાયત્રી છન્દઃ ।
ભૌમપ્રીત્યર્થં જપે વિનિયોગઃ ।
અઙ્ગારકઃ શક્તિધરો લોહિતાઙ્ગો ધરાસુતઃ ।
કુમારો મઙ્ગલો ભૌમો મહાકાયો ધનપ્રદઃ ॥ ૧॥

ઋણહર્તા દૃષ્ટિકર્તા રોગકૃદ્રોગનાશનઃ ।
વિદ્યુત્પ્રભો વ્રણકરઃ કામદો ધનહૃત્ કુજઃ ॥ ૨॥

સામગાનપ્રિયો રક્તવસ્ત્રો રક્તાયતેક્ષણઃ ।
લોહિતો રક્તવર્ણશ્ચ સર્વકર્માવબોધકઃ ॥ ૩ ॥

રક્તમાલ્યધરો હેમકુણ્ડલી ગ્રહનાયકઃ ।
નામાન્યેતાનિ ભૌમસ્ય યઃ પઠેત્સતતં નરઃ ॥ ૪॥

ઋણં તસ્ય ચ દૌર્ભાગ્યં દારિદ્ર્યં ચ વિનશ્યતિ ।
ધનં પ્રાપ્નોતિ વિપુલં સ્ત્રિયં ચૈવ મનોરમામ્ ॥ ૫॥

વંશોદ્દ્યોતકરં પુત્રં લભતે નાત્ર સંશયઃ ।
યોઽર્ચયેદહ્નિ ભૌમસ્ય મઙ્ગલં બહુપુષ્પકૈઃ ॥ ૬॥

સર્વા નશ્યતિ પીડા ચ તસ્ય ગ્રહકૃતા ધ્રુવમ્ ॥ ૭॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે અઙ્ગારકસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by Kirk Wortman kirkwort at hotmail.com

.. a NgArakastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*